# अर्थसंग्रहः

1. अर्थसंग्रहदिशा भावनास्वरूपम् आलोच्यताम् ?

⇒ लौगाक्षिभास्करेण 'अर्थसंग्रहः' इति नाम्नि मीमांसाशास्त्रे बालानां प्रवेशाय मीमांसाशास्त्रे प्रतिपादितं विषयसमूहं संगृहीत्वा ग्रन्थोऽयं विरचितः। मीमांसानुसारं "अपौरुषेयं वाक्यं वेदः" इति आख्यातः शब्दनिष्ठवेदस्य चेतनशक्त्याभावात् विध्यादिवाक्यानि कथं पुरुषं प्रवर्तयन्ति इति पूर्वपक्षीमतनिरासरूपेण मीमांसाशास्त्रे भावना जाज्वल्यमाना। ~~(तस्याः स्वरूपं भास्करेण कृतम्— "भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः")~~
अर्थसंग्रहे भास्करेण धर्मलक्षणानन्तरं भावनालक्षणम् उक्तम्—

"भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः" इति।

भावना इति एकः पारिभाषिकः शब्दः। भूधातोः उत्तरं प्रेरणार्थकः 'णिच्' एवं 'युच्' इति प्रत्यययोगे, स्त्रीलिङ्गविवक्षायां टापि 'भावना' इति पदं निष्पद्यते। यस्याः अर्थः भवति उत्पादना। लक्षणे भवितुः इत्यस्यार्थः उत्पद्यमानस्य, भवनानुकूलः इत्यस्यार्थः उत्पत्त्यनुकूलः, भावयितुः इत्यस्यार्थः प्रयोजकस्येति। भवितुरुत्पद्यमानस्य उत्पत्त्यनुकूलो भावयितुः उत्पादयितुः प्रयोजकस्य व्यापारविशेषो भावनेत्यर्थः। यथोत्पद्यमानस्योदनस्य ~~अन्न~~ उत्पत्त्यनुकूलो देवदत्तस्य व्यापारविशेषः ~~च~~ भावनेत्यर्थः।

सा च भावना द्विधा - शाब्दीभावना आर्थीभावना चेति।

□ शाब्दीभावना :- "पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः शाब्दीभावना" इति लौगाक्षिभास्करेण शाब्दीभावनायाः लक्षणमुक्तम्। अर्थात् प्रयोजकस्य व्यापारविशेषः भवति शाब्दीभावना इत्यर्थः। यथा च 'यजेत स्वर्गकामः' ~~(इत्यत्र इत्यस्मिन् विधिवाक्ये)~~ इत्यस्य विधिवाक्यस्य यजेतक्रियापदं यजधातोः लिङ्लकारस्य प्रयोगमस्ति। यजेतक्रियापदनिष्ठः लिङ्त्वविशिष्टः इतप्रत्ययः

शाब्दीभावनां बोधयति । उक्तञ्चार्थसंग्रहे — "सा च लिङंशेनोच्यते"। लिङंशश्रवणात् तथा श्रुतिमात्रतः नियमतः वा पुरुषस्य प्रवृत्तिरुत्पद्यते । यथा च ~~गोशब्दस्य~~ गोशब्दश्रवणानन्तरमेव गलकम्बलविशिष्टपशोः ज्ञानं भवति तथैव लिङ्श्रवणेऽपि पुरुषस्य ज्ञानं भवति यत् ~~अहमस्य कर्मणः व्यापारस्य~~ मम कर्मप्रवृत्तेः अनुकूलव्यापारवान् अयं लिङंशः इति । ननु लोकेऽस्मिन् कस्यचित् पुरुषस्य कर्मप्रवृत्तेः पश्चात् चेतनविशिष्टस्य पदार्थस्य व्यापारः कार्यं करोति इति दृष्टप्रमाणमस्ति । परन्तु वेदे पुरुषाभावात् तदभिप्रायः शब्दनिष्ठः एव । ततः भावनेयं शाब्दीभावनेति कथ्यते ।

शाब्दीभावना इयम् अंशत्रयमपेक्षते । ते खलु साध्यं, साधनम्, इतिकर्तव्यता चेति । तथा अस्याः भावनायाः प्रागेव त्रिविधविषयस्य आवश्यकता अस्ति । अंशत्रयसंयुक्ता सम्पूर्णा आर्थीभावना शाब्दीभावनायाः साध्यरूपेण अन्वयः भवति । लिङ्-लकारादिज्ञानं करणरूपेण तथा साधनरूपेण शाब्दीभावनायाः प्रयोजनमस्ति । अस्याः लिङादेः करणत्वं भावनाप्रतिपादकत्वेन न तु भावनोत्पादकत्वेन । विधिविहितकर्मणः प्रशंसाज्ञानमेव इतिकर्तव्यतारूपेण अन्वयः भवति । सा प्रशंसनीयता अर्थवादवाक्येन प्रतिपादयति इति ।

□ <u>आर्थीभावना</u> :- स्वर्गादिप्रयोजनेच्छाजनितयागादिक्रियाविषयकः व्यापारः आर्थीभावना इत्युच्यते । तथा चोक्तं अर्थसंग्रहकारेण — "प्रयोजनेच्छा-जनित-क्रियाविषयव्यापार आर्थीभावना"; इति ।

सा भावना च प्रत्ययस्य आख्यातत्वांशेनोच्यते आख्यातजातेः व्यापारवत्त्वात् । यथा - "यजेत स्वर्गकामः" इत्यादि विधिवाक्यं श्रवणानन्तरं श्रोतुः स्वर्गप्राप्तिहेतुयागादि-कर्मानुष्ठाने प्रवृत्तिः स्यात् । श्रोतुः पुरुषस्य यागविषयकव्यापारः एव आर्थीभावना इत्यर्थः ।

आर्थीभावनापि अंशत्रयमपेक्षते साध्यं, साधनम्, इतिकर्तव्यतेति । तथा किं भावयेत्, केन भावयेत्, कथं

भावयेदिति। तत्र स्वर्गादिफलं भवति साध्यम्, यागादिकर्म साधनम् एवं प्रयाजादि अङ्गसमूहः तावत् इतिकर्तव्यतेति।